## श्रीसुरसरस्वतीसभा, शृङ्गेरि

### तुरीया परीक्षा - प्रथमपत्रिका

दिनाङ्कः - 29-01-2023 | अङ्काः - 100

पूर्वाह्णे – 10:00 वादनतः 1:00 वादनपर्यन्तम् | समयः – घण्टात्रयम्

<u>सूचना – सर्वाणि उत्तराणि संस्कृतेन एव लेखनीयानि</u>

1 **पञ्चानाम् एकवाक्येन उत्तरं लिखत ।** 5

१. जगद्योनिः अयोनिः कः ?

२. शार्दूलाजिनविमलासनोपविष्टः कः ?

३. आनन्दगिरिः कः ?

४. गरुडः मृगावतीं कुत्र विससर्ज ?

५. कः अभियान्तं शीतांशुं ददर्श ?

६. द्रुपदेन कृतात् वैतानिकात् कौ उदपद्येताम् ?

७. के दमयन्त्यां जातरागाः सुधर्मातः प्रतस्थिरे ?

८. साकेतपुर्याः अपरं नाम किम् ?

2 **पञ्चानां त्रिचतुरैः वाक्यैः उत्तरं लिखत ।** 10

१. सुरेश्वरः वार्तिकं रचयितुकामो भगवत्पादान् किम् अभ्यर्थयामास ?

२. हंसः मानुष्या गिरा भैमीम् आमन्त्र्य किम् आबभाषे ?

३. भगवतः सप्तत्वसम्बन्धं विशदयत ।

४. पुत्रजननवार्तां श्रुत्वा शिवगुरुः किम् अकरोत् ?

५. विदुषा आत्मश्रेयसि कदा प्रयत्नो विधेयः ? सदृष्टान्तं विवृणुत ।

६. सहस्रानीकः कः ? तं देवेन्द्रः किमुवाच ?

७. कुन्त्याः सेवया प्रीतः दुर्वासाः तां किमाह ?

3 **द्वयोः विस्तरेण (सप्ताष्टैर्वाक्यैः) उत्तरं लिखत ।** 8

१. गिरिः गुरुसेवां कथं विदधौ ?

२. रघोरौदार्यं विशदयत ।

३. वाल्मीकिकृतचन्द्रोदयवर्णनं लिखत ।

४. कुन्त्या पृष्टो द्विजः स्वपरिदेवननिदानं किमाह ?

**4 वाक्यत्रयं सप्रसङ्गं विवृणुत ।** **9**

१. नेदं मांसपिण्डमपि तु सप्राणा मानुषस्त्री ।

२. मा भूत् परीवादनवावतारः ।

३. शीर्षेऽस्य व्यरचि रयेण पुष्पवृष्टिः ।

४. आवयोः साङ्ग्रामिकमुपकरणं सम्पादय ।

५. वाचा धर्मम् अवाप्नुहि ।

**5 द्वयोः भावं सान्वयं व्याख्यां कुरुत ।** **8**

१. यस्य चेतसि वर्तेथाः स तावत्कृतिनां वरः ।
किं पुनर्ब्रह्मयोनेर्यस्तव चेतसि वर्तते ॥

२. यः प्रीणयेत् सुचरितैः पितरं स पुत्रो यद्भर्तुरेव हितमच्छति तत्कलत्रम् ।
तन्मित्रमापदि सुखे च समक्रियं यत् एतत्त्रयं जगति पुण्यकृतो लभन्ते ॥

३. पुत्रांस्ते बहुवयसो बहून् किमज्ञान् एकं वा लघुवयसं ददामि सूनुम् ।
सर्वज्ञं तमिति शिवेन पृच्छ्यमानः त्वस्त्वेकः सकलविदित्युवाच विप्रः ॥

४. यद् ब्रह्म सम्यगाम्नातं यदग्नौ विधिना हुतम् ।
यच्च तप्तं तपस्तस्य विपक्वं फलमद्य नः ॥

**6 श्लोकमेकं पूर्णं लिखत ।** **4**

१. यावत् .................. कीदृशः ॥

२. एते ...................... जानीमहे ॥

**7 एकस्य कवेः देशकालकृतिमहत्त्वादीनां विषये लिखत ।** **4**

१. लक्ष्मणसूरिः  २. वाल्मीकिः

**8 एकस्य लघुटिप्पणीं लिखत ।** **4**

१. द्रोणः  २. कालिदासीया ब्रह्मस्तुतिः

9 **चत्वारि पदानि वाक्ये योजयत ।** 4

१. अवज्ञा २. अभूत् ३. योगिनः
४. उपरोद्धुम् ५. अहर्निशम् ६. भक्त्या

10 **चतुर्णां रूपाणि विवेचयत ।** 4

१. भानुमन्तम् २. वर्त्मनि ३. असकृत्
४. हैडिम्बेयः ५. जगाद ६. त्यक्ष्यामि

11 **चतुर्णां पर्यायपदानि लिखत ।** 4

१. भूमिसूनुः २. स्तोकम् ३. अञ्जसा
४. विष्णुपदी ५. विशाम्पतिः ६. कुञ्जरः

12 **चतुर्णां विग्रहवाक्यं विलिख्य समासनाम लिखत ।** 4

१. निर्बन्धसञ्जातरुषा २. अपुत्रः ३. त्रिलोकी
४. कार्यदक्षः ५. स्त्रीपुंसौ ६. कुलवृद्धिः

13 **चतुर्णां सन्धिं विभज्यसन्धिनाम लिखत ।** 4

१. पृच्छंस्तेन २. पूजयन्निन्द्रः ३. तावेव
४. अर्हतीति ५. शत्रव इव ६. प्रीतोऽसौ

14 **द्वयोः तत्तल्लकारे पुरुषत्रये सर्वाणि रूपाणि लिखत ।** 6

१. प्रयतस्व २. अतिष्ठत् ३. ववृधे ४. अवादीत्

15 **द्वयोः व्याकरणविशेषं लिखत ।** 4

१. मा शुचः २. नरकात् त्रायते ३. स्वस्त्यस्तु ते ४. अर्थ्याः

16 **समासमेकं सलक्षणं विशदयत ।** 4

१. बहुव्रीहिसमासः २. तत्पुरुषसमासः

17 **चतुर्थं पदं लिखत ।** 4

| | | | | | | |
|---|---|---|---|---|---|---|
| १. आचार्यचरितम् | – | कृष्णशास्त्री | :: | रघुवंशम् | – | ____________ |
| २. पाराशर्यः | – | व्यासः | :: | हैडिम्बेयः | – | ____________ |
| ३. नलः | – | दमयन्ती | :: | सहस्रानीकः | – | ____________ |
| ४. रामकृष्णौ | – | द्वन्द्वसमासः | :: | कुम्भकारः | – | ____________ |

18 **इतरवचनानि लिखत ।** 4

१. _________ _________ आहुः ।

२. फणिनम् _________ _________ ।

३. _________ रोचेताम् _________ ।

४. दुर्वासाः _________ _________ ।

19 **रिक्तस्थानानि पूरयत ।** 3

१. लोकवृत्तसाक्षिणो देवाः ________________ मे पतिं दिशन्तु ।

२. गान्धारी तु ________________ गर्भं धारयमाणासीत् ।

३. प्रणिपत्य ________________ तस्मै ।

20 **प्रयोगपरिवर्तनं कुरुत ।** 3

१. श्रृणु तत्र कारणम् ।

२. नागरैः अभ्यर्थितः धृतराष्ट्रः राज्यम् अकरोत् ।

------------------------